**CLASS : 12th (Sr. Secondary)** **Code No. 4305**

**Series : SS-M/2019**

*रोल नं०* | | | | | | | | | | | **SET : D**

# संस्कृत

## SANSKRIT

### *ACADEMIC/OPEN*

(Only for Fresh/Re-appear Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **17** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित - अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा निम्नाङ्कितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

अस्माकं जीवने पदे-पदे प्रत्येकं कार्येषु विज्ञानं व्याप्तमस्ति। विज्ञानस्य चमत्कारान् दृष्ट्वा वयं आश्चर्यं कुर्मः। सर्वेषु क्षेत्रेषु एव विज्ञानस्य लाभाः दृश्यन्ते। अद्य वयं वाष्पयानेन देशदेशान्तरेषु परिभ्रमामः। पोतेन अनायासं नदीः समुद्रांश्चतरामः। विमानेन आकाशे स्वच्छन्दं विहरामः। अद्य तु राकेट इति यन्त्रेण तु चन्द्रमसि अपि भ्रमणाय प्रयत्नं कुर्मः। मोटर-बस-कार-स्कूटर-इत्यादिभिः यानैः तु वयं प्रतिदिनं प्रतिपलं च आवागमनं कुर्मः। अद्य अस्माकं जीवने विद्युतः उपयोगः तु सर्वत्र दृश्यते। रात्रीणाम् अन्धकारे विद्युद्दीपकं प्रज्वाल्य सर्वत्र प्रकाशं कुर्मः। विद्युतः प्रभावेण व्यजनानि चलन्ति, रोमाञ्चकारिणि दारुणेऽपि शिशिरे शैत्यभयं न भवति। उद्योगक्षेत्रेषु विद्युच्छक्त्या मुद्रणयन्त्राणि, अनेकानि लौहमयानि यन्त्रोपकरणानि चलन्ति। तेभ्यः नवीनानि वस्तूनि निर्मीयन्ते।

***प्रश्नाः*** – $2 \times 5 = 10$

(क) प्रत्येकं कार्येषु किं व्याप्तमस्ति ?

(ख) केन आकाशे स्वच्छन्दं विहरामः ?

(ग) विद्युतः प्रभावेण कानि चलन्ति ?

(घ) विद्युद्दीपकं प्रज्चाल्य वयं किं कुर्मः ?

(ङ) अधुना पोतेन वयं किं कुर्मः ?

**खण्डः 'ख'**

**(रचनात्मकं – कार्यम्)**

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया लिखित – 6

(क) प्रातःकालीनभ्रमणम्।

(ख) समयस्य सदुपयोगः।

(ग) संस्कृतस्य महत्त्वम्।

**खण्डः 'ग'**

**(पठित – अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) अकस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत्, क्षणं सूक्ष्मविस्तारा, परतः प्रकटितशिखरि शिखर-विडम्बना, अथ दर्शित-दीर्घ-शुण्डमण्डित-दिगन्त-दन्तावल-भयानकाकारा ततः पारस्परिक-संश्लेष-विहित महान्धकारा च समस्तं गगनतलं पर्यच्छदीत्।

**अथवा**

(ख) पुनः किमासीत्। मम वीरदर्पस्य शौर्यस्य च प्रज्ज्वलितं ज्योतिस्तत्रैव निर्वाणमभूत्। चौरनिग्रहः कीदृशः, निजप्राणपरित्राणमेव मे अन्वेषणीयमभवत्। लगुडं प्रक्षिप्य कोष्ठके निलीनोऽभवम्। तत एव च कम्पित-कण्ठेन चीत्कारमकरवम्-लोकाः ! आगच्छत, चौरः प्रविष्टोऽस्ति।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले,
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

**अथवा**

(ख) ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्।।

**5.** अधोलिखितासु सूक्तिषु मात्र ***द्वयोः*** सूक्तयोः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) क्रूरोऽयं किन्तुर्मध्ये प्रविश्य सर्वं नाशयति।

(ख) कोटीश्चतस्रो दश चाहर।

(ग) दिदेश कौत्साय समस्तमेव।

(घ) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

तस्य गमनस्य दिवसत्रयात्परं कार्यालये पत्रमेकमागतम्। कौतूहलवशात् श्रीदासः तत्पत्रम् उद्घाटितवान्।

***प्रश्नाः*** – $2 \times 1 = 2$

(क) कः पत्रम् उद्घाटितवान् ?

(ख) 'तस्य' इति पदे का विभक्तिः ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तराणि संस्कृतभाषया लेखनीयानि –

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।

शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।

***प्रश्नाः*** - $2 \times 1 = 2$

(क) अकर्मणः किं ज्यायः ?

(ख) 'त्वम्' इति पदे कः शब्द ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - $2 \times 1 = 2$

(क) श्रीदासः तत्पत्रम् उद्घाटितवान्।

(ख) अविवेकः परमापदां पदम्।

**खण्डः 'घ'**

**(संस्कृतसाहित्यस्य - परिचयः)**

**9.** महाकविबाणभट्टस्य ***अथवा*** पं० हृषीकेशभट्टाचार्यस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 4

(i) रघुवंशम्।

(ii) समुद्रसङ्गमः।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार - परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्र***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत – $2 \times 4 = 8$

(क) इन्द्रवज्रा (ख) वसन्ततिलका

(ग) शिखरिणी (घ) वंशस्थम्

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – $2 \times 4 = 8$

(क) अनुप्रासः (ख) उपमा

(ग) अर्थान्तरन्यासः (घ) व्याजस्तुतिः

**खण्डः 'च'**

**(अनुप्रयुक्त - व्याकरणम्)**

**13.** 'दीर्घसन्धेः' ***अथवा*** 'व्यञ्जनसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**14.** 'करणकारकस्य' ***अथवा*** 'अपादानकारकस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**15.** 'तत्पुरुषसमासस्य' ***अथवा*** 'बहुव्रीहिसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**खण्डः 'छ'**

**[ बहुविकल्पीय - वस्तुनिष्ठप्रश्नाः ]**

**16.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत — 6 × 1 = 6

(क) 'समुद्रोऽपि' इति पदे कः सन्धिविच्छेदः ?

(i) समुद्रे + अपि (ii) समुद्रो + अपि

(iii) समुद्रः + अपि (iv) समुद्र + अपि

(ख) 'यत् + च' इति पदे किं सन्धिपदम् ?

(i) यच्च (ii) यद्च

(iii) यत्च (iv) यच

(ग) 'तेनैव' इति पदे कः सन्धिः ?

(i) दीर्घसन्धिः (ii) गुणसन्धिः

(iii) वृद्धिसन्धिः (iv) यण्सन्धिः

(घ) 'वाक्पटुता' इति पदे विग्रहोऽस्ति :

(i) वाक् पटुः (ii) वाचि पटुः

(iii) वाचि पटुता (iv) वाक् पटुता

(ङ) 'नृपतिः' इति पदे कः समासः ?

(i) तत्पुरुषः (ii) अव्ययीभावः

(iii) कर्मधारयः (iv) बहुव्रीहिः

(च) 'चन्द्र इव उज्ज्वलाः' इति विग्रहे किं समस्तपदम् ?

(i) चन्द्रेव उज्ज्वलाः (ii) चन्द्रोज्ज्वलाः

(iii) चन्द्र इवोज्ज्वलाः (iv) चन्द्र उज्ज्वलाः

**17.** लघूत्तरात्मक प्रश्नाः – $10 \times 1 = 10$

(i) 'किम्' नपुंसकलिङ्गे, द्वितीया विभक्तौ, द्विवचने रूपम ?

(ii) 'राजा' इति पदे का विभक्तिः ?

(iii) 'अश्नुते' इति पदे कः धातुः ?

(iv) 'अभवत्' इति पदे कः पुरुषः ?

(v) 'तृप्तम्' इति पदे कः प्रत्ययः ?

(vi) 'नि + षिध् + ल्यप्' एतेषां संयोगे किं रूपम् ?

(vii) 'नमः' इति उपपदयोगे का विभक्तिः ?

(viii) 'पयोदः' इति पदस्य समानार्थकमस्ति।

(ix) 'पुण्यात्' इति पदस्य विलोमपदमस्ति।

(x) 'अशुभम्' इति पदस्य विलोम पदं लिखत।